## ।। कार्यालय : जिला शिक्षा एवं प्रशिक्षण संस्थान चड़ीगांव, पौड़ी गढ़वाल ।।

Email- dietcharigaonpauri@gmail.com

# जिला शिक्षा एवं प्रशिक्षण संस्थान चडीगाँव पौड़ी गढ़वाल

## सत्र 2025 .2026

## (दिनांक–15 दिसम्बर 2025 से 17 दिसम्बर 2025 तक)

उत्तराखण्डराज्यस्य पौड़ीगढवालजनपदस्थित "जनपदीय शिक्षण एवं प्रशिक्षण संस्थान चड़ीगाँव इति" संस्थाने जनपदीय अकादमिक सन्दर्भ समूह" इत्यस्य त्रिदिवसीया कार्यशाला आयोजिता। अस्याः कार्यशालायाः शुभारम्भः डायट–प्राचार्येण सरस्वतीवन्दनया सह विधिपूर्वकं कृतः। ततः परिचय सत्रे सर्वैः प्रतिभागिनः स्वस्वपरिचयं प्रदत्तवन्तः, येन परस्परं शैक्षिक–संवादस्य सुन्दरं वातावरणं निर्मितं जातम्।




परिचय–सत्रान्तरं डायट–प्राचार्यः जनपदीय अकादमिक सन्दर्भ समूहस्य (District Reference Group) शैक्षिक–व्यवस्थायां महत्त्वपूर्णां भूमिकां स्पष्टतया निरूपितवान्, तेन राष्ट्रीय शिक्षा नीति २०२० (NEP 2020) इत्यस्य सन्दर्भे सन्दर्भ–समूहस्य उपयोगिता, अकादमिक मार्गदर्शनस्य आवश्यकता तथा नवाचारात्मक शिक्षण–पद्धतिषु अस्य योगदानं विशेषतया प्रतिपादितवान्। तत्पश्चात् कार्यक्रम–समन्वयिका श्रीमती रेणु महोदया, सह–समन्वयकः डॉ० हरिशंकर डिमरी





महोदयः तथा सह–समन्वयकः श्री नरेन्द्र बिष्ट महोदयः–एभिः त्रिभिः विद्वद्भिः कार्यक्रमस्य आयोजनम् उद्देश्यानि च स्पष्टतया अवबोधितानि। ए0पी0एफ0 त 4तेषाम् उद्बोधने पी०पी०टी० माध्यमेन डी०आर०जी० (District Reference Group) इत्यस्य गठनस्य आवश्यकता, तस्य शैक्षिकमहत्त्वं तथा एन०ई०पी० २०२० इत्यस्य आलोके

जनपदीय–सन्दर्भ–समूहभूमिका विस्तरेण विवेचिता। एतदपि सूचितं यत् गतवर्षेषु सन्दर्भ–समूहेन ये कार्याणि साधितानि, तेषां विवेचनं कृत्वा भविष्ये करणीयकार्येषु दिशा–निर्देशः अपि प्रदत्तः।

कार्यशालायां भाषा–प्रयोगशालायाः स्थापनायाः विषये चर्चा–परिचर्चा अभवत्। अस्याः प्रयोगशालायाः स्वरूपं, उद्देश्यं, छात्रोपयोगिता च इत्यादिषु विषयेषु समूह–सदस्यैः स्वस्वविचाराः,




प्रस्तावश्च परस्परं आदान–प्रदानेन प्रस्तुताः। अपरंच, एन०सी०ई०आर०टी० द्वारा प्रकाशितानां नवीनपुस्तकानां हिन्दी–मल्हार, संस्कृत–दीपकम्, तथा अंग्रेजी–विषयस्य पूर्वी पुस्तकानां विषये सारगर्भिता चर्चा कृता। पाठ्यवस्तूनां प्रकृतिः, भाषा–सुलभता तथा शिक्षण–प्रक्रियायां तेषां प्रभावः इत्यादयः पक्षाः विवेचिताः।

कार्यशालायाम् एतदपि सर्वसम्मत्या निश्चितं कृतं यत् षष्ठी कक्षादारभ्य अष्टमीकक्षा पर्यन्तं पाठ्यपुस्तकेषु आगताः व्याकरण–सम्बोधाः विद्यार्थिनां कृते सरलाः,रुचिकराः गतिविधिः आधारिताः भवेत् ।




एतदर्थं व्याकरण–आधारित गतिविधि–पुस्तकस्य निर्माणं कर्तव्यम् इति निर्णयः अभवत्। पुस्तक–निर्माणार्थं सम्बोधानां निर्धारणं कृत्वा तदनन्तरं लेखनकार्यस्य विधिवत् आरम्भः जातः।

समग्रतः, अयं त्रिदिवसीयः कार्यक्रमः एन०ई०पी० २०२० इत्यस्य उद्देश्यानुसारं शैक्षिकगुणवत्तावर्धनाय, भाषा–शिक्षणस्य सुदृढीकरणाय, छात्रानुकूलसामग्रीविकासाय च अत्यन्तम् उपयोगी च भवितुं शक्यते।

कुल प्रतिभागी शिक्षकः–24